# Skandaproktam Bhasmadharanaphalopadesham

# स्कन्दप्रोक्तं भस्मधारणफलोपदेशम्

## Document Information

Text title : Skandaproktam Bhasmadharanaphalopadesham

File name : skandaproktaMbhasmadhAraNaphalopadesham.itx

Category : shiva, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 6 | 59-71||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

# स्कन्दप्रोक्तं भस्मधारणफलोपदेशम्

(शिवरहस्यान्तर्गते ईश्वराख्ये)

स्कन्दः (उवाच)
अष्टस्थानधृतं त्रिपुण्ड्रमलिके स्यादष्टमूर्तिप्रियं
तद्वै द्वादशरुद्रदैवतमुमे तद्वादशाङ्गैर्धृतम् ।
मन्ये षोडशशीतलाङ्ककलया धार्यं त्रिपुण्ड्रं तनौ
द्वात्रिंशस्थित वर्ष्मणि त्रिभुवनाधीशास्पदं प्राप्नुयात् ॥ ५९॥

धृतं ललाटेऽक्षि दधाति भाले
पाणावथैणं शिरसीन्दुगङ्गाम् ।
वक्षस्सुचक्षुःश्रवसोरुहारं
हारोभवेत् भूतिविभूतिभानैः ॥ ६०॥

यो वह्निसप्तकमनुप्रथितोरु भस्म-
भूषस्त्रयायुषमनुप्रथितोरुपुण्ड्रः ।
भालैणवाहसख एणकृताङ्कमौलि-
रेणीदृशार्धतनुरेणकरो भवेत् सः ॥ ६१॥

विरजानलजां समिद्भवां वा
सितवर्णां किल धारयेद्विभूतिम् ।
स्मृतिजातानलभस्मधार्यमाहु-
र्गृहिणां वै नियमेन सर्वथापि ॥ ६२॥

वनदावोत्थभवं वनेचरो
यतयः सर्वगतं सितं सदा ।
अतिवर्णाश्रमधर्मतत्परः
पितृकान्तारगतं विलेपयेत् ॥ ६३॥

विप्राणां पचनाग्निसम्भवमुमे धार्यं त्रिपुण्ड्रात्मना

भस्मैवाघहरं भवेत् हितकृत्पादोद्भवानां सदा
सङ्कीर्णेष्वपि रथ्यपथ्यविहितं भस्मैव तत्पावनम् ॥ ६४॥

धन्यानामिदमेव मङ्गलकरं सद्भालललिप्तं मुने ॥ ६५॥

भस्मत्रिपुण्ड्र परिमण्डिततुण्डगण्ड
श्रीबाहुदण्डयुगलांस बृहत्पिचण्डः ।
चण्डांशुसूनुनिलयं न स जातु पश्येत्
इन्दुप्रभासरसमौलिकटाक्षषण्डैः ॥ ६६ ॥

भवेत्स विभवाधिकः प्रतिभवेऽपि भावादरो
भवोद्भवसमर्चनप्रभवितात्मभावः सदा ।
भजेत भसितं सितं यदि तदा तनुं सन्त्यजन्
भवेत्किल हि ना नरः (यमादृतः) परमकातरः पामरः ॥ ६७॥

शिवे भसित भूषणो भवति भाग्यपूर्णो नरो
वरश्रुतिपरायणोऽप्यहह भस्मपुण्ड्रोज्झितः ।
द्विजाधमकुलानल प्रबलधूमकेतुर्भवे-
त्कदापि नरकालयान्न हि स जातु मुच्येत च ॥ ६८॥

धृतसितभसितत्रिपुण्ड्रभूषा
यतिमतिगतिदायिनःस्तुतेशाः ।
कृतवरसुकृतोज्झितारिवर्गा-
मितहिततपसा भवन्ति हाराः ॥ ६९॥

नाम्ना न शौचाचमनक्रियाभिः
विद्यापि कृताकृताभिः ।
भस्मत्रिपुण्ड्रोज्झितभालगात्रः
पात्रं स नामुष्मिकपुण्यहेतौ ॥ ७० ॥

वीतैषणस्त्रिषवणं किल भस्मभूषो
योषाविरुद्धहृदयः किल भक्तवर्यः ।
शाक्तः स मुक्तिपदवीमभिवीक्षितुं वै
त्र्यक्षप्रसादमखिलं स तदा लभेत ॥ ७१ ॥

॥ इति शिवरहस्यान्तर्गते स्कन्दप्रोक्तं भस्मधारणफलोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । ईश्वराख्यः दशमांशः । अध्यायः ६ । ५९-७१ ॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 6 . 59-71..

Notes:
Skanda स्कन्द summarizes about the merits of applying Bhasma Tripuṅḍra भस्म त्रिपुण्ड्र. ŚivaRahasyam daśamāṃśaḥ शिवरहस्यं दशमांशः has several chapters devoted to Bhasma भस्म - it′s preparation, application, related mantra-s etc.

Proofread by Ruma Dewan

*Skandaproktam Bhasmadharanaphalopadesham*
pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*